नं: १११-घ
काशिकावृत्तिटीका
पदमञ्जरी चतुर्थाध्यायस्य
द्वितीयपादः
पत्राणि २३

नं० १११-घ

काशिकावृत्ति टीका पदमञ्जरी चतुर्थाध्यायस्य द्वितीय
२ पाद =

पत्राणि २३

नं० १११

२३ पत्राणि

व्यकर्णा पदमंज्जरी

९०

नं. ११९६
काशिकावृत्तिटीका
पदमञ्जरी
पत्र सं. २५



प:म० ॥ ॥ श्रीगणेशाय नमः ॥ ॥ तेन रक्तं रागात् ॥ ॥ रंजिरयमस्त्र्यामिष्वंगे भोजने रक्त इति चाभिधानाद्विशेषे रक्तो गौः लोहित इत्य
१ र्थः । अभिशुक्लस्य वर्णान्तरापादने रक्तः पट इति तत्राद्ययोरर्थयोर्ग्रहणे रूपेणाकांतायां रक्तः कोपेन रक्तं मुखमित्यत्रापि प्राप्नो
तीति मन्यमानः उत्तरीयमर्थमाश्रित्याह शुक्लस्येत्यादि एतत्त्वाभिधानस्वभावाल्लभ्यते । रज्यतेऽनेनेति राग इति घञि च भावक
रणयोरिति नलोपः । भावसाधनस्तु रागशब्दो न भवति न हि रंजनक्रियैव रंजनक्रियायाः करणं भवति । रागविशेषणादिति
इति स्वरूपग्रहणं तु न भवति । उत्तरत्र लाक्षादीनां रागग्रहणे न विशेषणाद्रागात् । रागादिति किमिति । अनभिधानादेव कृतेर्वा
चिन्तो न भविष्यति । देवदत्तेन वस्त्रमित्युक्ते स्वस्वामिभावस्यैव संप्रत्ययादिति प्रश्नः । लक्षणैकशरणो नैतत्प्रतिपत्तुमर्हतीत्य
तरं कथमिति । अन्यद्वर्णान्तरमापादितमिति प्रश्नः । उपमानादिति । रूपसादृश्यनिमित्तात् ॥ ॥ लाक्षारोचनाशकलक
र्दमाट्ठक् ॥ ॥ शकलकर्दमयोर्ग्रहणं किं दर्शनात्तस्य वैपरीत्ये पः नील्या इति अण्विधिविशेषो नीली । अथवा धनार्थवचने नीलशब्दस्तस्य
रागशब्दवादेव नीलीरक्तं वस्त्रं सिध्यति । पीतादिति । रागविशेषवाची पीतशब्दः इदमपि वचनमगाधनार्थमेव स्वार्थिके क रम १
प्रत्यये पीतरक्तं पीतकं शब्दो रागवचनो वस्त्रे लभ्यते ॥ ॥ नक्षत्रेण युक्तः कालः ॥ ॥ इह पारमर्षीः कालं क्रियामानमिच्छंति

कल३

:ग्रहयोक्तं स्यादित्यग्रहणं नक्षत्रपरिस्पंदमथापरे। भिन्नमाहुर्निमेषादेः कालं कालविदो विदुरिति। वैशेषिकास्तु द्रव्यमाँशभ अखंडं तं च
व्यापारव्यतिरेकेण कालमन्ये प्रचक्षते। नित्यमेकं विभु द्रव्यं परिमाणं क्रियावतामिति द्वयोरपि दर्शनयोर्नक्षत्रेण कालस्य योगो
न संभवति। किं कारणं। व्याप्तिपूर्विका प्राप्तिर्योगः कालविशेषावधारणार्थो हि लोके योऽर्थादिशब्दप्रयोगः एवं विध एव च योगः
। कालविशेषावधारणाहेतुर्भवेन्न व्यपदेशाय द्वयोरपि नक्षत्रकालयोर्नित्यत्वात्कालस्य सर्वगतत्वान्न कदाचिद्योगः। क्रि
यापदेऽपि नक्षत्रगत्यायाः क्रियायाः कालाख्यायाः समवायलक्षणो हि योगो व्यभिचाराद विशेषणं स्यादिग्गताया रूपसं
भवाद विशेषणं पदिति यथा कथं चिद्योगः तदा व्यभिचाराभावः न हि सोऽस्त्यहोरात्रः यः पुष्येण न युक्तः। तस्मान्नक्षत्रेण युक्तः का
ल इत्ययमनुपपन्नो निर्देशः। कथं तर्हि निर्देशः कर्तव्यः। नक्षत्रादेर्युक्तात्तद्युक्ते काले प्रत्ययविधानं युक्तं लोपश्च पुष्येण यु
क्तश्चंद्रमाः पुष्ययुक्तः पुष्ययुक्तेन युक्तः कालः इति पुष्ययुक्तशब्दाच्चंद्रमसि वर्तमानात् प्रत्ययः युक्तशब्दस्य च लोपः पौषी रा
त्रिः पौषमहः एवं सर्वं तत्र युक्तवद्भावे दोषः। मघायुक्त शब्दात्प्रत्यये क्रियमाणे तस्य लुपि मघा इति स्त्रीत्वबहुत्वे न सिध्यतः युक्तस्येव तु चं
द्रमसो लिंगवचनप्रसंगः। अथ तेन नक्षत्रवृत्तिना एव प्रत्ययो विधेयः नत्वत्तयोर्योगः संभवतीति मघा एवं तिकं पुनरिति। न चंद्रमसैव योगे
पुष्यादीनां नक्षत्रताज्योतिर्मात्रवचनत्वान्नक्षत्रशब्दस्य येन पुष्यादीनामादद्धिकी नक्षत्रता चंद्रमसा योगे भवतीत्याहुः॥ तेषामयं पक्षो युग

पृ.म० २

पत्रः।पुष्यादिसमीपस्थ इति।मुख्यार्थासंभवे गौणस्याप्यग्रहणमपि भवति।तत्र मघादयः शब्दाः अपरिमितः स्वलिंगसंख्या एव चंद्रमसि वर्त्तन्ते
पद्यामंत्रादयः पसमंचान्त्रिपसः शेषेपि तेन पुष्ठेन युक्तवद्भावविषयेपि दोषाभावः।पुष्यसमीपस्थेन चंद्रमसा युक्त इत्यर्थ इति।यद्यपि चंद्रम
सा कालस्य योगो नित्यः चंद्रमसो नित्यत्वात् तथापि पुष्यसमीपस्थेन तु कादाचित्कः पुष्यसमीपस्थतायाः कादाचित्कत्वात्।पौषीति॥ सू
र्यतिष्येत्यादिना यलोपः॥ ॥ लुबविशेषे॥ ॥ पद्यद्विशेषे लुब्भवति इहापि प्राप्नोति पौषी रात्रिः पौषमहरिति।अत्रापि यद्यप्यो वे
ति विशेषो न गम्यते अथ रात्रिरहरिति विशेषावगमाय तदाप्यस्य निषेधो भवति इहापि तर्हि न स्यात् अद्य पुष्यः तिष्यः कृत्तिका इति अथ
वादिविशेषावगमाय न पुष्येणायसमश्नीयादित्यादावेव तत्स्यात् यत्र मनागपि विशेषावगमः।अत्र आह न चेदित्यादि।रात्र्यादिरि
बो५ त्यादिशब्देनाहर्मुहूर्तादेरुपसंग्रहः।विशेषोऽभिधीयत इति।प्रत्ययान्तेन।एतदेतदवस्थाप्य यतिपतानाणिति।किंपांसुका लोन इन्द्रेणयु
ज्यत इत्यत आह अहोरात्र इति।षष्टिनाडिकात्मक इत्यर्थः।यावंतं हि कालमेकस्य नक्षत्रस्य समीपे चंद्रमा वर्त्तते तदेवं यावन्न कालो न
क्षत्रेण युज्यते तस्य सर्वस्य प्रत्ययांतेनाभिधानमविशेषजदेकदेशस्याभिधानं विशेषः।एतत्तु प्रत्ययांते तु प्रवेशात् अत्र रंगवाद्वल्म
ते प्रसज्य प्रतिषेधस्यापंजेन पौषो होरात्र इत्यत्र समुदाये नापि प्रतीयमानोवयवद्वयात्मकः प्रतीयत इति तदाप्यस्य प्रतिषेधो भवति राम
इह पुष्येण युक्ता पौर्णमासी पौषी मघाभिर्माघी त्यादौ लुप्प्राप्नोति।ज्ञापकात्सिद्धं यदयं विभाषा फाल्गुनी श्रवणा कार्त्तिकी चैत्रीभ्य २

इति निर्दिशति तत्ज्ञापयति न पौर्णमास्यां लुब् भवतीति श्रवणाशब्दात् अनुभवति श्रवणा कार्त्तिकीति निर्देशाद् एवं कथं तर्हि श्रावणं पौर्णमास्या
मिति अबाधकान्यपि निपातनानि भवन्ति ॥ ॥ संज्ञायां श्रवणाश्वत्थाभ्यां ॥ ॥ विशेषार्थोयमारम्भ इति । ननु संज्ञायां नियमार्थः । वि
धिसंभवे नियमायोगात् श्रवणा कार्त्तिकीत्य संज्ञायामपि लुप् प्रदर्शनात् । लुपि युक्तवद्भावः कस्मान्न भवतीति । श्रवणारात्रिरित्यत्र ०
। निपातनादिति ॥ ह्रस्वत्वं प्रत्ययलक्षणेन न भवति श्रवणयोः कारणं इ विवर्त्तिज्ञानात् ॥ ॥ द्वन्द्वाच्च ॥ ॥ नक्षत्रग्रहणमनुवर्त्तते षष्ठ्य
दूय न तस्या विपरिणाम्यते तद्वद्वस्य विशेषणमित्याह नक्षत्रद्वन्द्वादिति । राधानुराधा यारात्रिरिति । एकदेशद्वारेणाराध्यादेर्नक्ष
त्रद्वन्द्वयोगः । राधानुराधीयमिति अघोत्यस्याव्ययस्या लिङ्गत्वेपि सति तद्विशेषणस्य नपुंसकत्वं लोकाश्रयत्वाल्लिंग
स्य । लुप्प्रसङ्गाद्बाधते छ इति न लुप्प्रसङ्गः पुनश्छ प्रत्ययेऽपि प्रतिषेधः लुप्छयोर्युगपत्प्रसंगः । तत्र पादर्शनस्य हि लुप्संज्ञा
तस्य कथं प्रत्यये न सह प्रसंगः तस्मादयमत्रार्थः मध्ये पवादाः पूर्वान्विधीन्बाधन्ते नोत्तरानिति अनेन मध्यं लुप् णत्र भवतिना
न्यस्य ते नायं छो लुपो विषये प्रयुज्यते ॥ एतदेव लुप् प्रतिबाधकत्वं । पारज्ञादिति यतोऽयं परः तेन लुबस्य न भवति तेन तद्विषयेऽप्य
सौ प्रयुज्यत इति ॥ ॥ दृष्टं साम ॥ ॥ यस्य साम्नो विशिष्टकार्यस्य विषये विनियोगो येन विज्ञातः तत्तेन दृष्टमित्युच्यते ॥ ॥
कलेर्ढक् ॥ ॥ सर्वत्रेति । न केवलमग्नेः सास्यदेवतेत्यस्मिन्नेवार्थे ढक् नापि केवलं दृष्टं सामेत्यत्रैवार्थे कलेर्ढक् अपि तु

पृ॰ म॰ ३ सर्वेष्वेव प्राग्दीव्यतीयेष्वित्यर्थः। संग्रहश्लोके ह्यातेवाप्यशादिष्विवृद्धिविधी प्रोक्ते जातेचाद्विरागिकन्या विधीयतइत्येतेषां प्राप्तः जातेर्येयो द्विर
गाद्विधीयते सदाद्विवर्ततीर्थ्यर्थः ॥ नविद्याया इति। विद्यावाचिनः द्वेकश्रुः भवतीत्यर्थः गोत्रादङ्कवदिति। चाकेयो दृष्टः प्रत्ययः स
3 मर्वैति दिश्यतेन वुंकरणवाहृत्यविहितः तदनेन संख्याकल्पहृगो ष्विप्रस्यायागोत्रचरणाद्वुञित्यस्यपवुञोऽत्रातिदेशः ॥ ॥
वामदेवाद्यड्यौ ॥ ॥ डित्करणं किमर्थमिति यस्येति चेति लोपे नैव सिद्धिं न वाच्यम्। अनयोर्ग्रहणं मा भूदिति वाध्यक्रियमाणो
पि डित्करणो कस्माद्देवान योर्ग्रहणं न भवतीति तन्नाह अननुबंधकेति। अननुबंधकग्रहणे न सानुबंधकस्येति परिग्रहणोऽयं तोर्ग्रहणं य
न भवति एकानुबंधकपरिभाषया तु पदद्वहणोद्यतो महणाभवः। वामदेव्यमिति अव्ययपूर्वपदप्रकृतिस्वरेण आद्युदात्त एव भव
भवति संग्रहश्लोके अतदर्थ इत्यनेन ययतो ष्यातदर्थइत्येतत्स्वरं लक्ष्यते। नञः स्वरादिति नञाश्रयः स्वरो नञ्स्वरः उत्तरपदा
न्तोदात्तत्वं तस्मिन्विधीयमाने इत्यर्थः ॥ ॥ परिवृत्तो रथः ॥ ॥ चार्मणादिति ॥ ॥ अविति प्रकृतिभावः परिवृत्तो रथ इति तदेकां
तग्रहणायेन परिवृत्तो रथ इत्यदेकान्तश्चेद्भवतीति वक्तव्यं तेन चर्मवस्त्रादावेव भवति इतरथा द्वाबादाव पि प्रसंग इत्याह स
मंताद्वेष्टितइत्यादि। हृरोति तैर्वेष्टनेपरिः सर्वतो भावे। यस्य न कश्चिदवयवइति। वाङ्कल्पाभिप्रायमेतत् न हि च के नेमि राम
प्रभृतयः च मंगाद्विधीयंते नाप्यंतरवयवाः ननु तत्कारी चाय पंपदाहृ [illegible] छान्नेः परिवृत्तइत्तिनद्वेषी च पदाह समंताद्वेष्टित ३

इत्यादि नृपं तत्कारी त्यौपचारिकोयंप्रयोगःपरिवृतइव परिवृतः।। ।।पाण्डुकम्बलादिनिः।। ।।माणवचर्यैनेवसिद्धइतियोहि।। येनपरिवृतः
सतस्योपरिचारोनिहत्त्वर्थमितिपद्ध्येतव्यारभ्येतपरिवृतोरथइतिविवक्षायां पूर्वेणाणासाप्रसज्येत।। ।।द्वैपवैयाघ्रादञ्।। ।।द्वी
पिव्याघ्रयोरिति। विकारेणाणमपिसमानार्थानामेकशेषःप्राप्नोतीतिअत्रांतरज्ञातिभेदेनभिन्नार्थत्वान्नभविष्यतीतिसमाधातव्यं
।चर्म्मणोवरथस्यपरिवारणंसंभवतीतिविकारमात्रेणोतिचर्म्मणीसुखे। द्वीपिव्याघ्रशब्दाभ्यांप्राणिरजतादिभ्योञित्यञ्प्रत्ययःद्वी गृ ४
पिनश्चिल्लोपः।। ।कौमारापूर्ववचने।। ।।अपूर्ववचनइतिअपूर्वशब्दोभाववचनःअपूर्वस्यवचनमपूर्ववचनंतस्मिन्नपूर्ववचने
कस्यपुनरपूर्वत्वंकाविवक्षितत्वादित्यतआहपाणिग्रहणस्येतिएतद्वनिपातनसामर्थ्याल्लभ्यते उभयतइतिअण्प्रत्ययादेतानसिःस्त्रीपुंस
योरुभयोरप्येतन्निपातनमिष्यतेउभयोरप्यपूर्वत्वयोरपूर्वत्वंस्त्रियाएवनपुंसइत्यर्थः।तत्रकौमारेतिस्त्रीपुंसयोःसांरणप्रातिपदिकमा
त्रनिर्देशादवसीयतेउभयोरपिनिपातनमिति ।स्त्रियाएवापूर्वत्वमित्येतन्नुनिपातनबलाल्लभ्यते।अपूर्वपतिमिति।यस्याःस्यागीर्न
केनचिद्गृहीतपूर्वेःसाअपूर्वपतिरितिकृत्वाजामुपपन्नत्वात्भार्यान्वेनस्त्रीकृतवानित्यर्थः।सतुपूर्वकतोद्वाहोभवतुमावाभूतअप
र्वपतितिरितिअपमपिवक्तव्योहि।अत्रापिपुरुषःपूर्ववत।कौमारेत्यादि।कौमारेतिनिपात्यतेअपूर्ववचने।किमत्रनिपात्यतेकुमार्याः
अरिविधीयते।कदा।अपूर्वत्वेयदातस्याः।यदाकुमार्याअपूर्वत्वंनपुंसःतदेत्यर्थः।कुमार्याभवतीतिवेस्मनेनयोगःस्वत्यास्वाप

प्रमं: ४ तैयः कुमारीमुपपन्नः तस्यामसौ भवति तदा यत्नवान् धर्माचरणादेतत्तस्थं न तु भवइत्येवाराणु सिद्धः यद्यपि स्याध्यादिकमपि कुमार्यां भव
ति तथापि सत्यभिधाने तत्र भवइति [redacted] भवत्येव सूत्रारंभेपि हिनासौ दंडवारितः एवं तावत् कौमार इति सिद्धं स्त्रियामपि सिद्धं
५ कथं कौमारस्य स्त्री कौमारी वत्यामत्याचयस्यामसौ भवन् कौमारव्यपदेशं लभते सैवाभिधीयते न स्त्रीत्वं तस्य सूत्रारंभे प्यंगीक
र्तव्यं ॥ ॥ ततो हृतमभवत्तेभ्यः ॥ ॥ अत्रोद्धरतिरुद्धरणपूर्वकेनिधानेवर्ततेतेन सप्तमीसमर्थाद्विभक्तिर्नोपपद्यते भुक्तोच्छिष्टमि
ति शिष्टमेवोच्छिष्टं यथा उच्छिनष्टिसर्वं जुहोतीति भुक्तशिष्टमित्यर्थः । यस्योद्धरणमिति यसिद्धिरिति पैष्टिकोतिस्तुदोवुकुलमितिभूते
कर्मणि णित्वुट् । शरावे हृतमिति उद्धृत्य निहितमित्यर्थः स्थंडिलाछपितरिवते ॥ शाखिनइति संज्ञा तथा स्व इत्यर्थः ॥ यद्वा शास्त्रशब्दा
त्तनीयामसमर्थाद्विधाने येषा तिपदिकौवयरतिरिणच् ॥ कर्मणि कः शास्त्रेणाविहितइत्यर्थः स्थंडिले शयितुं व्रतमस्येति स्थंडिलव्र
तव्यं व्रतस्याक्रियारूपत्वात् ॥ ॥ संस्कृतं भक्षाः ॥ ॥ संस्कृतमित्यत्र कर्मसामान्ये प्युत्पाद्यतेतेन नपुंसकं लिंगमेकवचनं च भक्ष्या इत्ये दृ।
तत्तु स्वरूपापेक्षया बहुत्वापेक्षं शेषे प्युत्पाद्यते तेन पुल्लिंगं बहुवचनं च तत्तु वाक्यगम्यस्यार्थस्य पदसंस्कारेनुपयोगात् संस्कृतमित्येत
द्भवति त्वत्र एव विशेष्यसंबंधं दर्शयति यत्र संस्कृतं भक्षाश्चेत्ते भवंतीति चरणो यत्कर्मणो चेत्स्कर्तुं निवत ॥ ॥ तच्छस्य प्रकृतिनिर्दिश्य २ राम
मानलिंगता रक्षविशादमितिरवरंकदिनं विश दंविभक्तं भद्र शब्देनोच्यते इति पद्यप्यभशोवास्तु भइइति भद्रयतेरन्यत्रापि धयो ४

दृः— त्रिंशोबहत्तिपौर्णमास्यां तु न्न भवतीति पूर्वमेवोक्तं। भूतकमासेवेति। भूता एव भूतकाः कर्मकरास्ते
षां येमासः कर्मकरणादारभ्य

गस्त्र याप्यभिन्नशब्दत्वं तत्रैवमसिद्ध इति भावः।। ।।शब्दोरवात।। ।।शब्दो रवादिति समाहार द्वंद्वः उरवा पात्रविशेषः पक्वस्वांगव्याप्त
रवाशब्दः तस्येह ग्रहणं न भवति स्वांगे संस्कृतं यस्य भक्ष्य स्याभावात् कथमुख्योग्निरिति न ह्यसौ भक्षः भक्ष्यार्थे दिगादित्वाद् इहमध्ये
।। ।।दध्नष्ठक्।। ।।इह तु दधि केवलमाधारभूतमिति यथा शूले संक्रियमाणस्य मांसस्य शूलं यद्यप्युपदध्न्यपि संस्कारकं तथा
पि न तत्र द्विवर्त्तितं किंतु तदाधारस्य द्रव्यांतरे ग्राह्य संस्कारः स एव विवक्षित इति भावः।। ।।उदश्वितोन्यतरस्यां।। ।।औदश्वित्क
इति।। इस्सुसुक्तांतात्कः।। ।।क्षीराड्ढञ्।। अत्र संस्कृतमित्येव संबध्यते न भक्षा इति तेन यवाग्वामपि भवति क्षैरेयी ति दिवे [illegible]
त्या दिनाडीषु।। ।।सास्मिन्पौर्णमासी [illegible]।। तत्तत्त्वे हि वर्हिते ति ततःप्रत्ययांताल्लोकस्य वित्रयोर्णेतति चेत एवं प्रत्ययो भवति
नान्यथेत्यर्थे संज्ञायामिति समुदायोपाधिरिति शब्ज देवस्य हृयतिघ्रत्ययांतेन चेदिति पौषी पौर्णमासी तिव्रुवै त्रिंशद्रात्र
त्वहशाः स यदा पौष्यां पौर्णमास्यां त द्वान भवति स तत्र न मासो दिव्यपदेशभाकृतजैत्रेत्यर्थः। तुल्यमेव फलमिति किंपु
नस्त द्विताहृप्रयोगानुस्मरणमिति शांयुता ह्युट। संज्ञाशब्देन तुल्यतामिति। तुल्यफलतामित्यर्थः। इति करणस्य ज्ञापकि
मिति।। किंपुनरिदं ज्ञापकसाध्यं न ब्राहनद्यपमिति ज्ञापनस्य प्रयोजनं दर्शयति संज्ञार्थे वेदिति। संज्ञाशब्देन तुल्यफल वे
इत्यर्थः प्रवर्त्ति भेदेन चायमर्थो ज्ञाप्यते इति संज्ञायामिति द्वितीयाप्रवृत्तिः इह शास्त्रे संज्ञायामित्यस्यार्थ इति शब्दो वे

पुःमः दितव्यइतिपरिभाषासंपद्यते।पूर्णमासादण्।इति। पूर्णमासोस्यांतिथाविति रङ्गवीहिपक्षादेराकृतिगणत्वादस्मादेवाणि पातनात्
५ दणा।माइति चंद्रउच्यते इति।वइमपूर्णशब्दस्यवेकदेशप्रयोगइत्यमामाआमेतिवत॥ ॥आग्रहायण्यश्वत्थाद्वञ्॥ आग्रहाय
5 नमःस्यात्।आग्रहायणीपक्षादेराकृतिगणत्वादणासूत्रेसंप्रदानत्वंज्ञाप्यमितिणत्वं।अश्वत्थेनयुक्तापौर्णमासी।अश्वत्थानिपातनात्
पौर्णमास्यामपिस्तुसूत्रप॥ ॥सास्यदेवता॥ यागसंप्रदानंदेवतेतियद्यपिदेवशब्दोमनुष्यादिवतजातिवचनःस्वार्थिकश्चैततथा
पिसमुदायशक्त्यादेवताशब्दोयागेदर्शपूर्णमासादौपद्यतेसंप्रदानत्वेनचोदितंतत्रसर्वत्रवर्ततेनजातिविशेषइत्यर्थः। देवस्यपुरोडाश
देव स्वामिनीति।दिवौ स्वर्पककर्मणोदेवताशब्दव्युत्पत्तिंदर्शयतिएवंचकृत्वावा[redacted]षसोयतत्कालेभ्योभवेदितिवचनमुपपद्यतेनाद्यतनुष
जा५ पितृपुत्रक्रियौतिरस्तितथापितृदेवेदेवदेवत्यमितिप्रयोगोप्येवमेवोपपद्यतेकथमितिपुरोडाशादिकस्यदेयस्याभावादिंद्रस्य
संप्रदानत्वंनास्तीतिप्रश्नः।मंत्रस्तुत्यमपीत्यादिनानेनौपचारिकत्वंप्रयोगस्योच्यते अयमपिमुख्यएवप्रयोगःयागसंप्रदाने।
सार्वल्लोकिकःप्रयोगः।अयंतुनैरुक्तानामित्येतावान्विशेषः।उपचरंतीतिब्रुवतेप्रयुंजतइत्यर्थः।कथमित्यादिपूर्वोक्तंप्रकारद्व
यमत्रनास्तीतिप्रश्नः[redacted]उपमानादितिकथायोगइंद्रेभस्यकर्णाविवितिवत्गौणोयंप्रयोगइत्यर्थःसेतिप्रकृत २प
इतिप्रकृतेहिंसायहणंसंज्ञयासंबद्धमितितदनुवर्तनेसंज्ञायाअप्युवृत्तिःस्यात॥ ॥कस्येत्।किमोविभक्तौकादेशेकृतेत्॥क ५

त्वं५

कप्राद्द्[ति —
एवंव५

अपांनपातं यजेति ५

स्येति निर्दिष्टमिति । शंका मघनपाते । एवं च हकारा का पादु न्वह्नीति संबुद्धिः । न लुक् स्मात् अनुब्रूहीति । कस्मै देवाय हविषा विधेमेति । छांदस
: स्मै भावः । पदं द्वायी स्ववमस्याममित्यादिवत् । कायमिति । इदं हृते पस्येति लोपः । आमः परं वा दादि ध्यावो ध्वनै थ्री ईं वता स्य प्राय
हविरिति वत् । सोमाद्युगोत्य त्रकं यहणो क्विपमात्र लोप द्यो पि पस्येति लोपात परवादादि द्विर्भवति कृता पामा मीवृद्धो
पस्येति लोपः स्यात् ॥ अपोनप्त्रपांनप्तृभ्यां घः ॥ ॥ अपोनपात् अपांनपात् इति देवतानामधेये इति घोस्या दिवादनयोः साधुत्वं ।
तयो क्वचित्प्रयोगे नेति ॥ ॐ अपोनपाते अनुब्रूहि । अपांनपाते अनुब्रूहि । अपोनपातं यजेति संप्रैषा भवंति । वेदे वपोनप्त्रे
स्वाहा । अपांनप्त्रे स्वाहेति छांदसत्वप्रयोगः ॥ ॥ छ ॥ ॥ योगविभाग इत्यादि पूर्वसूत्रएव छग्रहणो सति वछोद्वो प्रत्ययो क्व
ती च पिठेइति स्यात्संख्यातानुदेशः । शतरुद्रीयमिति ॥ शतशब्दो नक्त वचनः शंतरुद्रा देवता अस्येति वछोजयोर्विधानसा
मर्थ्याद्विगोर्लुगनपत्ये इति लुङ् भवति ॥ महेंद्राद्घाणौ च । महेंद्रादस्य मानेन अनंतरः छग्रवसमुची येन न व्यवहितो घइति
पुनर्ग्रहणं । सोमाट्ट्यण् । सौमी ति । दिवा नडीय हलस्तद्धितस्येति यलोपः ॥ वाय्वृतुपित्रुषसो यत् ॥ वायव्यमिति ॥ द्यावापृथिव्यां
तौ पित्र्यं पितृव्ये । पित्र्यमिति रीङ्ङृत इति रीङ् यस्येति लोपः ॥ द्यावापृथिवी शुनासीर मरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ ॥ अ
रागोरागस्य वा पवादइति [redacted]

पा:म: ६ 6

[redacted]कीवास्तोष्पतिशब्दात्परस्तत्रपदस्यापस्यापवादः। शेषेभ्योरा॥ द्यावाद्याध्यौँति दिवोद्यावादिव सम्भ्रष्टयि
द्या मिति द्यावादेशः। शुनासीराड्छितिदेवताद्वंद्वे चेत्यानेङादेशः। शुनो वायुः सीर आदित्य इति। अन्ये त्वेकमेव शुनासीरमिन्द्रम
गुणं मन्यन्ते पर्यायत्वाच्छलायनं इन्द्रो वा शुनासीर इति। मंत्रलिंगं च भवति इंद्रं वयं शुनासीरमस्मिन्यज्ञे हवामहे इति मरुतोस्य संति
मरुत्वानिंद्र अग्नीषोमीयमिति इंद्रदेवे सोमवरुणायोः वास्तोष्पतीयो वास्तोष्पतिः अस्मादेव निर्देशात् साधुः गृहमेधशब्दमकारांतं
वहवचामन्यंते मरुद्भ्यो गृहमेधेभ्य उत्तरा इत्यापस्तुनापनगृहमेधाः समवाप्नते तिच मंत्रलिंगं मरुद्भ्यो गृहमेधिभ्यः सर्वा मांडुग्धे सायंपथोदन
मितितस्मै निरीयकं तत्रचेकारांतो नकारांतो वेति विप्रतिपत्तिः॥ अग्नेर्ढक्। कालेठञित्यत्रोक्रमेवायं स्मात्पतिपादीव्यज्ञीये खिति॥॥
कालेभ्यो भववत्॥ कालविशेषपर्यायेभ्यः स्वरूपग्रहणं नै भवति बहुवचननिर्देशात्। वत्करणामित्यादिष्वमतिवत्करणे कालेभ्यो
भवइत्सुच्यमानेपदितावदेवं संबंधः कालेभ्यो भवेपे प्रत्ययाविधास्यंतेतेसास्यदेवते त्यत्राप्यर्थे भवंतीति देवतापक्षतिरविशेवि
तास्यात्तत्रतत्रश्चकालोऽच्छितिटञ्चेद्द्वादेरपिप्राप्नोति अथ पुनरेवं संबंधः भवेपे प्रत्ययाविधास्यंते तेभवंतिकालेभ्यो देवेंद्रातिप्र नाभ्यव इ
वृमपिभवप्रत्ययान विशेषितास्युः तत्रच्छदिगादित्योपदितिप्रत्ययो पि भवे विहितः कालेवाविभ्यो स्मिन्नर्थे प्राप्नोति अथ ॥राम
[redacted]वाप्येवं संबंधः कालेभ्यो भवेपे प्रत्ययास्ते भवंति कालेभ्य एव देवतार्थे इति तत्र सरूपत्वात्कालशब्देभ्यो वृद्धभयसंबंध ए ई

वंताडुर्ल्लभः। अथापिलभ्येत एवमपि यत्क्वचित्कालाद्भवे प्रत्ययो पृतः कृतस्तद्देवतायाः स्यात्तैष्मोऽग्रासुहृत्तादेरपि प्राप्नो[illegible]ति।
निर्द्देशे वसति सर्वस्मादृश्यपरिग्रहो भवति तेन याभ्यः प्रकृतिभ्यो येन विशेषणेन भवे[illegible]र्थे विधास्यंते ये प्रत्ययास्ताभ्य
[illegible]व प्रकृतिभ्यस्तेनैव विशेषणेन तत एव प्रत्यया भवंतीति नार्थो विदनिष्टं॥ महाराजप्रोष्ठपदाट्ठञ्। महाराजो वै श्रवणः प्रोष्ठ
पदशब्दात्तु पूर्वेणानष्ट्राणि प्राप्ते वचनं नव पत्रश्चाग्रपरां प्रौष्ठपदीमासादयतीति अस्मिन्वर्त्तते तद्द्वयं पौर्णमासी तिथिः पूर्णोमासोस्या
ति यो वर्त्तते इति ~~[illegible]~~ विग्रहः। ठञ्षेष्वन्यत्र तिःस्मा[illegible] स्मिन्पौर्णमासीत्यत्रापि दर्शिता॥ पितृव्यमातुलमातामहपितामहाः। पितृ
मातृभ्यामिति स्वरूपपदार्थकत्वेना भ्र ह्रितत्वे विशेषाभावाल्लब्धं द्वन्द्वस्य पूर्वनिपातः। अपो निसंबंधवाचिवादानन्तुको मावश्च। उम
हजिलिकयं तन्मध्योकारेव ग्रहः मातामहः पितामह इति तस्मात्महच्च प्रत्ययः। पितृमातृभ्यां मेवाति तःतपो श्चान्तडादेशः इति के
चित्तद्विंकारस्य संहितापाठस्यैवान्तिमस्यावात्रलक्षणेन पदकाराश्चनुवृत्त्याः इति त्यापे नावग्रहो माकारीतिमन्यते। मातरि षिद्वे
ति षिद्वमुपसंख्येयमिति सर्वथा तत्पुनः [illegible] षकारानुबंधः कर्तव्य इति देशाभावात्तेन मह्योत्वपि मंवे दृश्यते। अवेर्दुग्ध इति दुग्धं क्षीरं सोढादी
नामादेशप्रत्ययपोरिति षत्वं न भवति सकारोच्चारणसामर्थ्यान्निष्फलस्तिल इति समस्यावस्थापां फलरहित उच्यते धान्याव
स्थापां प्रयोजन स्याद्यन्यते॥ ॥ तस्य समूहः॥ ॥ सर्वस्येव विषयस्यापवादेरव स्यद्वात्तष्टकठिकिमिहोदाहरणामिति

प:म: ऽकार्कैकवृकशब्दा आद्युदात्ताः प्राणिनां कुपूर्वाणामित्यनेन अस्यार्थः व्यधिकरणे षष्ठ्यौ च यादित्वात् कुशके टेरित्यतः आदिरित्य
७ नुवर्त्तं षष्ठी बहुवचनं तेन विपरिणम्यते प्राणिनां विना ये आदिभूताः कवर्गास्तेभ्यः तेषामुदात्तो भवतीति तेन शोकमित्युदा
7 हरणं खंडिकादिषु पाठात् वृकशब्दस्योदाहार्यः।। भिक्षादिभ्योऽण्। अणग्रहणं बाधकबाधनार्थमिति। ~~भिक्षादिभ्योमिभिको~~ भिक्षा
शब्दोयं गुरोश्च हलन्त इत्यकारप्रत्ययान्तो दात्तः ततोनुदात्तादेरञ् अणो बाधकः प्राप्नोति। तस्य बाधनार्थमणग्रहणं। ननु च यद्यत्रा त्रा
ञ् स्यात् पुनर्वचनमनर्थकं स्यात्।। नानर्थकं परत्वाद्विज्ञलहणात् कृप्राप्नोति। तत्बाधनार्थमणः पुनर्वचनं स्यात् ~~[illegible]~~
[illegible]स्तु न तेषां यग्रहणादरो च भवति।। गर्भिणामिति। भस्याढे तद्धित इति पुंवद्भावे नञ्जो पोनिवृत्तिः ततो णत्वं नरपनपास्तत्ति प्रकृतिभा
वा नस्तद्धिते इति लोपाभावात् स्यग्रहणासामर्थ्यात् पुंवद्भावो न भवतीति यादिस्यात् सिद्धं प्रत्ययविधाविति वचनात् अनुत्पन्न
एव तद्धिते पुंवद्भावेन भवितव्यं पुंवशब्दाश्च कनि सुवर्षीति कनिन प्रत्ययान्तात्वादाद्युदात्तत्वोस्य। गिँकारणं वा राम् सिद्ध इति तस्येहृण
त२ दोनर्थकः स्यात् पौवर्टमिति प्यादुर्वात्तिकं तथा पुंवद्भावस्त्वष्यते। आहद्द भिक्षादिषु युवतिग्रहणमनर्थकं पुंवद्भावस्य सिद्धत्वात्
प्रत्ययविधाविति।। गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्।। ।। अपत्याधिकारादन्यत्रेति। यद्येवं राजन्यमनुष्ययो राम्
रुपादानमनर्थकं गोत्रत्वस्येव सिद्धत्वात्। नैतावपत्यप्रत्ययान्तौ जातेः अपत्यार्थत्वात् उक्तं हि रात्तो पत्ये जातिग्रहणं मनोर्जातावञ्यतौ षु

ता

केतिकिं तत्र्युच्यते पक्षतपाके राजन्यमनुष्ययुवा नइतिपलोपोनभवतीतियावता अनापत्यप्रकारवे अन्नभविष्यतिसत्यं । अप
त्यार्थ एव मनुष्ये पतेतद्वच्यते यद्यपत्यार्थ एव मनुष्ये पते राजन्यमनुष्ययोर्ग्रहणमनर्थकं नानर्थकं ज्ञापनार्थं वा तदेतत् ज्ञापयति नैनतपो
रपत्यकान्तं भवतीति तेन पलोपो न भवति सर्वथा पक्षतपाके राजन्यमनुष्ययुवा नइति न वक्तव्यं अत्रो पगवकमितियथा तत्र पुरोष्यनुदात्त
स्सकादेरञ्न भवति तथा एवं ठिकादिभ्यश्छेत्यत्र वक्ष्यते ।। ।।वात्स्यगात्रात्रावराङ्वाघन । नकारः स्वरार्थ इति ञ्नित्यादिर्नित्यमिति आ
द्युदात्तत्वं यथा स्यात् किमर्थं पुनर्नाम्य रागादिभ्योपविधीयते नञ् कृतोपञ्चे विधीयते नहि द्वेद्वेषुपञ्चोपनो वा विशेषो । स्त्रितदेष
ष्पंसरवस्वाः पुनः स्वरस्वरितत्वादन नुह्यति ज्ञापनार्थं तदेतत् ज्ञापयति अन्येभ्यो प्ययं भवतीति किं सिद्धं भवति ष्ठाडुपसंख्या
नं चोदयिष्यति तन्न वक्तव्यं भवति द्वानां समूह इतिष्ठ शब्दस्कोति विशेषवचनः । ष्ठ्यः षडहइति । तद्धितेतडुपचारः । गास्त्ववक
र्वाइतिसकारः पदसंज्ञार्थः तेनपार्श्वमित्यत्र भवत्या भावादेर्गुणो न भवति ।। ।।अनुदात्तादेरञ् ।। अविनात् पूर्ववात् टकाभवित
वामिति विनवंत उदात्तात् कपोतमयूर शद्वीलवावंत इति मध्योदात्तो इत्युपधालक्षिः तरतेः स ठञ्न्तक्रौं मस्य इति किप्रत्ययान्तस्त्रिति
रिशब्दः प्रत्ययस्वरेणान्तोदात्तः सवङ्गावेना द्युदात्तत्वं न भवति डणादयो वहुलमितिवहुलवचनात् ।। ।।रैवतिकादिभ्यश्छः ।।।।
द्वइकोश्चेतिहुडकस्यापत्यानि जनपदवद्वादितिविहितस्यतदाजैकमालवात्तु द्वद्वलवरागस्यजयडः ।। दुर्वैरो वात्र सिद्धश

स्पलु   भ्पा३

मे ५

प ः म ः ट तीसमासांतोदात्तत्वे सति शेषनिघातेनानुदात्तादित्वात् । ननु च परत्वादिति । अभ्युपेत्य गोत्रत्वमेतदुक्तं देवदत्तनाम्नीत्याह न च गोत्रसमुद
योगो त्रमिति तत्र यथा जनपदसमुदायो जनपदग्रहणेन गृह्यत इति काशिकोमली यादस्य त्रत्वं भवति न च वृद्धादपि वुञ्
चनेति जनपदलक्षणो वुञ् न तद्वदत्रापि गोत्रलक्षणो वुञ् न प्राप्नोतीति भावः । स्यादेतत् मा भूत् समुदायो गोत्रं मा लक्षण शब्दस्तु गोत्रं भवति
तत्र श्रुतदत्तविधिना समुदायादपि वुञ् प्राप्नोतीति तत्राह नवेति येन विधिस्तदंतस्येत्यसमासप्रत्ययविधौ प्रतिषेध इत्युक्तं । ए
दंतं ही त्यादि कथं केन पत्नेनोभयं शक्यं ज्ञापयितुं शक्यमित्याह अन्यथानुपपत्त्या ज्ञापकं भवति उभयेन च विना नास्यावृद्धत्वंवि
धानमुपपद्यत इति किमत्रानुपपन्नं गोत्र गोत्रपूर्वविप्रतिषेधे ज्ञापनस्य प्रयोजनं औपगवकं कापटवकमिति तु ओध का श ः यदा ग्लुचुदा
न वं ग्लुचुकस्यापत्यं ग्लुचुकायनिः प्राचामवृद्धात्फिन् तेषां समूहो ग्लौचुकायनकमिति अत्र स्त्रका पोतकमित्यादि गोत्रमवका ध
ः गोत्राद्युदात्तादेरुभयप्रसंगे परत्वाद अस्यात् तस्मात् ज्ञापकादुञेव भवतीति तदंतविधिज्ञापनप्रयोजनं च न हस्तिनां समूहो हा नह
स्तिकं गोधेनुकमिति जंलेधेनुवलगांतस्येत्यत्रापदह द्वि विकल्पः पुनरस्यैव नियमार्थं त्वं वर्गापि ष्यकमयमेकेनयत्नेनोभयं ज्ञापं ने ः नध्यं इ
चनिगमस्येत्याशंक्याह दुदक मालशादित्येतावतेति योगविभागेन यत्नेनद्वयं माश्रीयत इत्यर्थः । द्वौदकमालवी द्वौद कमाल ः म ट
वकमिति उभयत्रापि मालवादुत्पन्नस्य द्वैगोनेलुगवीतित्तु कि प्रतिषिद्धे आपौं सेतियल्लोपः आसिद्धिरित्यादि अनुदात्तादेरिति

गरे   प   प   म

हेत्वर्थं विशेषणं पतोर्येऽङ्कमालवशब्दोऽनुदात्तादिः तस्मादनुदात्तादेरित्येवान्तः सिद्धिरस्ति कोर्थस्तस्य गणपाठेनेति शेषः न किंचित्प्र
योजनमित्यर्थः गोत्वलक्षणोऽत्र जश्नाप्नोतीत्यत्र तत्तद्बाधनार्थः पाठः इति चेन्न चाहङ्गोत्वस्यापि तिङो व्याहुर्विधीयते । नचवतन्तद्वृद्धकं मा
लवेति शब्दस्यांगोत्रमित्यर्थः तदन्तादिति मालवशब्दस्य गोत्वान्तत्वात्तदन्तविधिनाप्राप्नोत्येवनमत्वेत इति व्याख्या । दिवात समन्तस्यान्ता
नेमिस्तत्तदन्तविधिः सर्वत्र नमवतीत्यर्थः तदन्तत्वइति तदन्तविधिरस्ति [redacted] त्यस्मिन्नर्थे इत्यर्थः तथा चेतिषेतुर [redacted] नन्ति [redacted] षेनू
नोसमद्दहः श्रीधेनवंऽन्त्यादिवाद्वादर्जपद्वापिधेनुशब्दस्तत्त्वपव्यतेत यापिवकपास इति लिंगादधेनुशब्दादपिभवतीतत्र पदि
सामहिकेषुतदन्तविधिर्नस्यात अनजिति [redacted] प्रतिषेधोनर्थकः स्यात । प्रयोजनान्तरमप्याहसेनायामितियद्येतिः प्रत्ययविधिप्रतिषेधे
न वुञाञ्जोऽग्ध्यापधास्यादित्येवमर्थस्त्वत्स्य गणे पाठ इत्यर्थः उलूकशब्दोऽत्र पठ्यतेस च लघांवत इति मध्योदात्तः छन्दसि लुपदु
लूकोवदतिमोघमेतत् इत्याउलूकश्चापप्रादितियदाघुदात्तवंतछान्दसं इत्यम । भाषायां तुमध्येदात्तवमेवतन्त्रस्वरे गोवाज
सिद्धः तस्मादेवंवकव्यं जलूकशब्दो गर्गादिपञ्चतः तस्यपञ्जोथ्वेति वृद्धप्लुतकिकृतेपङ्क्तेकेतिरूपं तदिह पठ्यत इति । व्यमति १२
हितस्यपाठेउलूकानांसमहह इत्यर्थे विवक्षायां गोत्रे लुगवीतिलुकः प्रतिषेधासेलुकयशब्दाहोवा अयोवुञ् प्राप्नोतिशुक शब्दोऽत्र प
ध्यतेतस्यसमहहइत्यत्रलपस्यवनान्यवातिपदविधानमसौ सुकोदात्तकाकश्चौकंवाकमेतितस्मान्तत्र थोकमित्यस्यसिद्धा
मुत्पादयतीत्यापिशलेः स्यूत्रं । अत्र द्वयर्थानुबंधोमतृपः । कस्यैवत्वेसस्वतं ता तत्परस्यकादेशो द्र
द्वव्यः । अर्थमात्रं वा भाष्यकारेण निर्दिष्टं । एकमिति । ठकमित्यर्थः । ८ घ३

१३ ए नेवाकमिति पठितं संबन्धकशब्दः श्वाणिनं कुमुद्वर्णाणामित्याद्युदात्तः॥ युगवरत्रेति पठ्यते तत्संघातविग्रहीतार्थमिच्छन्ति पोडगरत्रं यो
गं वारत्रमिति। तत्र संघातपदे जातिरश्वाणिनामिति द्वन्द्वे कवद्भावेन पुंसकत्वं स्वत्वं समाति युगवरत्रादिति दीर्घे निर्देशो नुपपन्नः। तस्म
स्मा युगसहिता वरत्रा युगवरत्रेति समासः कर्त्तव्यः जातिपरत्वाभावाद्वा एकवद्भावाभावः॥ चरणेभ्यो धर्मवत्॥ ॥ गोत्रचरणाद्वु
१ ञित्यारभ्य प्रत्ययावधारणं तु इति। ननु च न तत्र धर्मग्रहणमस्ति तत्कथं धर्मवदित्यतिदेशो युज्यत इत्यत आह तद्वेदमिति इदमे
व धर्मवदिति वचनं लिङ्गमस्ति तत्र चरणाद्धर्माम्नाययोरिति वचनमिति सर्वेषामादृश्यार्थ इति अस्मिन्नतस्मिन्न चरणेभ्यो धर्मव
त्युच्यमाने यदि तावदेवं संबन्धः चरणेभ्यो धर्मे ये प्रत्यया विधास्यन्ते ते भवन्ति समूह इति समूहप्रकृतिरविशेषिता स्यात् तात
का तर्यकादिभ्योऽपि वुञादयः प्रसज्येरन्नथ पुनरेवं संबन्धः धर्मे ये प्रत्यया विधास्यन्ते ते चरणेभ्यः समूहे भवन्तीति एवमपि धर्म
प्रत्यया न विशेषिताः स्युः ततश्च तस्येदमिति विधास्यमाना अणादयोऽपि कठादिभ्यः प्रसज्येरन्नत आह एवं संबन्धः चरणेभ्यो ध
र्मे ये प्रत्ययास्ते भवन्ति चरणेभ्य एव समूह इति तत्र सकलस्य चरणशब्दस्यैवमुभयसंबन्ध एवं तावदुपलम्भः त्वा पि लभ्यते एवम
पि यः कश्चिद्धर्मे प्रत्ययः स न तः कृतश्चिच्चरणशब्दात्स्यात् कौपिञ्जलहास्तिपदादण् कठादिभ्योऽपि स्यादत वतिनिर्देशे सति सर्वस्मा ॥ राम
द्दृश्यपरिग्रहो भवति तेन यो यस्मात्प्रकृतिभ्यो येन विशेषणेन धर्मे विधास्यते इहापि तस्मात्स एव प्रकृतिभ्यस्तेनैव विशे ९

न्यः—

षेरोऽंतरण्वभवंतीति न किं विदनिष्टं। काटकं कालापकमिति गोत्रचरणाद्वुञ्। छांदोग्यमिति। छंदोगौक्थिकेति ञ्य आथर्वणमिति।।
। आथर्वणीकस्येकलोपश्चेत्यण् इकलोपश्च।। अचित्तहस्तिधेनोष्ठक्।। ।। अचित्तोऽर्थपशुदरतिः अचित्तार्थे वुपेन नाम्ना
।न्निन्यायेन अगोपशादेः कपोतादिषु किंतु अस्त्र उरितार्थस्यात्रोऽपि परत्वात्तद्बाधकत्वस्य र्थः हस्तिधेनु शब्दयोस्त्वत्स्यपस्वरे
गांतोदात्तपोरनुदात्तादिलङ्गणस्याञोऽपवादः हस्तिशब्दो हस्तशाताविनीतेश्वत्यपांतः धेनुशब्दो धेटो नुरिति नुप्रत्ययांतः आ ठ्ठे४
धेनवमिति उत्सादिपाठादञ्। जंगलधेनुवलजांतस्येति पढेरेवध्यभावः।। ।। पाशादिभ्यो यः।। ।। यप्रत्ययांतं पाश्येति स्वभा
वतः स्त्रीलिंगं वातशब्दोऽत्र प्रपद्यते वाताना संस्त्रमूह्णो वात्याऽऽष्यमृतादर्शनाद पुंक्रोत्रसमूहः तस्मादीद्भवे प्रत्ययो वहन्त्यः नेः।
वदोषः एकस्यापि वातात्वपवितो दिग्देशभेदेन भेदाध्यारोपः तदा यपप्रत्ययसमूहः अयवादापूः ति दिशं वगतावपवित एव भि
घंतेत याच पुंति भ्रामसः पूर्वो वा तः उत्तरो वा तः सर्वतो वांति वाताइतिप्याहु चवायोर्भर्युसंमूर्छनं नानावेलिंग मिति।। खलगो
रथात्। अयमेकस्मात खलादपोऽपि पाशादिष्वेवन पठिताऽस्त्वं हि विभक्तित्र्यां द्वारापितव्यो भवतीतिवाहुपाशादिषु पाठ इति
।। ।। उत्ति। इनित्रकटयचश्च।। ।। योगविभागोऽयथासख्यार्थः अन्यथा इनित्रकटयचश्चेति यः इकारादयस्त्रयो तिचत्वारः प्रत्ययाः स्यु क्रत

व— ष्ये

प॰म॰ प्रकृतिरन्यइति विशेषणं स्यात् खलादिभ्य इति खलादयः प्रयोगतो गम्याः एते पि प्रत्ययाः स्वभावतः स्त्रियामेव ॥ ॥विषयो देशे ॥ ननु
२० च विषयस्य देशव्यभिचारात् देश इति विशेषणं व्यर्थमित्यत आह विषयशब्दोपमिति । अत्यन्तशीलितो त्यन्तमभ्यस्तः
10 तत्र देशग्रहणं ग्रामसमुदायप्रतिपत्त्यर्थमिति । यद्येवं देशग्रहणमेवास्तु मा भूद्विषयग्रहणं । नैवं शक्यं । देशशब्दो पि ना
नार्थः देशनं देश इति क्रियाशब्दस्यापि भावात् । शिबीनां विषयो देशः शैब इति कथं शैबो देश इति । निवासविवक्षायां
अ तस्य निवासः जनपदे लुबिति लुपि भविष्यति । नव र्थभेदो भवति । शिबीनां निवासो जनपद इत्यत्र स्वामिभावो न प्रती
यते अन्यदीयेपि जनपदे निवाससंभवात् शि[illegible]बीनां विषय इत्यत्र तु स्वामिभावः प्रतीयते न तु निवासार्थः । तत्रावसता
मपि तत्स्वामित्वसंभवात् । संपय एवासौ येषां विषयः तत्रैव तेषां निवासे जनपदे लुप् स्मर्यते तेन निवासमात्रे अत्र वाभि
धानस्वाभाव्यं हेतुः । एवं च शिबीनां विषयः शैबो वक्तव्य अत्रार्थे शैब इत्यपि भवति । एवं वसातीनां विषयो वासातः तेषामेव ।
निवासो वसातयः । तथा गांधारीणां विषयो गांधारः निवासो गंधारयः । अंगाः वंगाः सुह्माः पुंड्रा इति निवासरूपत्वेन विव राम
क्षितेन विषयरूपताः एवं राजन्यादिभ्यो वुञित्यत्रापि विषयविवक्षायां राजन्यकः निवासो राजन्याः तत्रैव वैल्वत्वेन ना
प्रविषयविवक्षायै वर्तते न वैल्वदनकं चांबारीयक मित्याद्येव भवति न वैल्वचाभिधानशक्तिरेव हेतुः त[illegible]दाह विषयाभिधाने १०

जनपदे लुप् ॥३॥ ऊरवन विषयात् । गोक्षत्र्यादिभ्यो वा ॥ राजन्यादिभ्यो वुञ् ॥ वैल्ववनादिभ्यो नित्यं । नवाभिधेयस्य निवासविष
यत्वात् ॥ निवासविवक्षायां लुप्प्रतिषेधविवक्षायांचाप्यप्रइति ॥ भौरिक्यादिरिति छंदसः प्रगाथेषु ॥ छंदसइतिनस्वरूपस्यग्रहणं
नापिमंत्रब्राह्मणयोः कस्यतर्हि अक्षरराशेः मियतावचनः छंदःशब्दः यस्मिन्पस्य जगत्याद्ययो विशेषाः तस्येदं ग्रहणं ॥ प्रगा
थानामादौ तस्यैवसंभवात् तेनपंक्त्यादिशब्देभ्यः प्रत्ययः पंक्तिर्द्वेष्टुभोत्तिस्रः क्रियंतइति । चतुर्थषष्ठोपादौ वार्हते प्रगाथे पुनर
प्यस्यउत्तरयोरवस्येदित्येवमादिनाप्रकारेण ॥ तद्यथा पंक्तापंक्तावः ॥ विपंमित्रुन शंसिषोत्रिपं मित्रं न्नशंः । मिषमूर्जो न पातं स
हिनामस्मयुद्दौसेमहद्यदाजयइतिपोयमुच्चारणप्रकारः तन्नगायनं । प्रग्रथनादितिप्रगाथः प्रशब्दस्यप्रहत्रिनिमित्तंदर्शय
तिप्रगृह्यतइति प्रगाथः यत्वक तेरि चकारकइति कर्मणि ॥ ब्रह्मणोदवादिवाडे फनकारयोर्लोपः । प्रगाणाद्द्वेति । क्रत्यवद
तियावैकौगेशब्देप्रगीयतइति प्रगाथः ॥ ३ ॥ विकुविग निर्ममस्थनेत्रे प्रमिति ॥ कुटीकुटीरइतिस्वार्थिकस्यापिरप्रत्ययस्यप्रया
भिन्नलिंगतात्पर्येहापिनपुंसकत्वं द्रष्टव्यं ॥ संग्रामे प्रयोजनयोद्धृभ्यः ॥ समर्थानां प्रथमाद्वेतिवर्तनात्संग्रामवाद्भ्यः प्रत्य
यः प्राप्नोति । न प्रयोजनयोद्धृभ्यः चासमनिर्दिष्टेभ्य इत्याशंक्याह सेत्यतिसमर्थविभक्तिरित्यादि । प्रथमासमर्थविशेषणमि
ति । तेन विशेष्यद्वारेण प्रयोजनयोद्धारः प्रथमानिर्दिष्टाः । प्रत्ययार्थविशेषणं संग्राम इति तेन द्वारेण संग्रामश्च मनि

पृ.मं दिष्टः॥ धर्मज्ञःसमयः प्रमाणं वेदाश्च॥ अस्यामिति कृत्यपार्थः स्त्रीलिंग इति। एतेन लिंगस्य विवक्षितत्वं दर्शयति। धर्मज्ञानान्निर्विकाविन इति भा
२२ वेयोघ्यत्रतदंतादित्यर्थः॥ श्येपेनंपातेतिपठनेपातः श्येनानांपात इति कर्तरि षष्ठ्याः समासः ततो श्येनतिलस्य पाते इति सुमंघाका
॥ र इति इयवचनोपघकर्म्माणि॥ अत्र उपसर्गस्य ह्रस्वम् अनुष्येव कूलमिति शह्रस्य दीर्घत्वं सामान्येन वेदं विधानमिति। एतदेवोदा
हरणेन द्रढयति दंडपात इति॥ ॥तदधीतेतद्वेद॥ इह यो पंग्रंथमधीते स तं स्वरूपतो वेत्ति यश्च वेत्ति सोवश्यमधीत इति अन्य
तरोपादानेन न सिद्धे किमर्थमिमाव यथोपदिश्येते नैतयोरावश्यकः समावेशः अध्ययनं शाब्दपाठः अर्थावबोधो वेदनं भवति वे
८६ कश्चित्तु संपाठं पठति नार्थं वेत्ति कश्चिदर्थं वेत्ति न संपाठं पठति हि स्त इहयामित्यादि तदधीते वेदेत्युच्यमाने समुच्चयो विज्ञाये
त ततो यस्तदधीते वेद च तत्रैव स्यात् य एक केवलमधीते वेद वा नैव स्यात् हि स्त इह रोनुवाक्यभेदेनाधीयाने विद्यो ः प्रत्येकं प्रत्य
य विधानं सिध्यति ननु च तदस्य तदास्मिं स्यादित्यत्र नार्थे निर्देशोप्रत्येकं समर्थविभक्तिः संबंधनीयेति हि लं इह गोन न्याय्यो तर्मु
ह्रयप्यतेत्र तत एव तेन द्वीयतीत्य प्रत्ययं पृपसे योन भवति न ऋ माः इहैव हि क्रम् ह गामधीयान विष्णोः इ याग विधाना यमिति
किंतर्हि उत्तरत्र क्रौ। रस ज्ञाताद्वक्रु भमंतादित्य सुगित्यत्रापि किंचेकारणं न स्यात् क्रवशद्दः कर्म नामधेयं वसीन्ताद्योप्यर्थो न राम
तेषामध्ययनं संभवति तस्य शद्दविषयत्वात् तत्सहरिति तयंप्येसंभवति गोणावाद्गुन गृह्यतेऽश्वं वा मुख्य एव व यथे वेदनं संभवती ११

तिर्तिभेभ्यो विहिष्यते वस्मात नाध्येतरि इत्युनत्तद्ग्रहणान्नुपपत्त्या तयोरण्यापि ग्रहणानन्तरापि भवति। कालत्वादिसूत्रान्तादक। क
तविशेषवत्त्वविभ्यप्रति। स्वरूपस्य ग्रहणान भवेत्तिय दिस्यात उक्तादिष्वेव पठेत्। केवलसंज्ञान्य यावचिनामपि सोमयागादीनां पर्यायाणां
नभवतिऽहात्तिदिषु पत्तशब्दस्य पाठात्। तस्मा द्विशेषवाचिनामेव ग्रहणामप्येतेभ्यो मुख्यार्थ ह्वान्निभ्यो वेदितारि प्रत्ययं तत्स्वतिपा
दनपरं ग्रंथवत्तिभ्य स्त्वध्येतरि। वार्त्तिकसूत्रिकरति। हतौसाधुवा तिंकेकपादिभ्यष्टक्वा वा त्तिंकं चतत्सूत्रं वेत्ति कर्मधारयात्प्रत्य
यः एवं साग्रहसूत्रिकज्ञति। कल्पसूत्रमितिकर्मधारयः समाहारद्वंद्वोवा। पत्त्यापत्ति पाप्रभरेणोति। एतपापोगे पंचमीविंत्याए
नवपिपरशब्दात् पादिकः। पदात्तद्विधावुत्तराधरदहिरण्यादातिरिति नानुवर्त्तते दिकूशब्देभ्यप्रत्ये चानुवर्त्तते। नचतान्यधीपा
नेप्रत्ययप्रष्यतरति। टक्कारणप्रत्ययद्वयमपिनेष्यतेतैनोक्तान्यधीतइतिवाक्यमेवभवतित्रं नचानभिधानमेव शरणं। सा
कि॰४ मन्त्रग्रहणात्तिशाख्यश्यास्त्रमौक्तिकयम। औक्तिकं नामास्नायप्रदमर्थैछंदोगौक्तिकेति न्यः। औक्तिकशब्दाद्वप्रत्य
योनभवतीति। अण्प्रत्ययप्रत्यर्थः। इदं च संगाउक्तं। सूत्रान्तादिति चात्यल्पमिदमुच्यतइत्या हविधालग्रहणा कल्पसूत्रान्तादि
तिवक्तव्यमिति। विद्याचेत्यादिवाक्ये नातिप्रसक्तस्यापवादः अंगादिसूत्रे विद्याशब्दः प्रत्ययनोत्पादयतीत्यर्थे तैविद्यइति।
ञवयवा विद्यात्रिविद्यातामधीते त्रैविद्यः। तिस्रो विद्या अधीतइतितु विग्रहे द्विगोर्लुगनपत्यइति लुक्प्रसंगः। पाव

१:मे. क्रीतिकइति।।यवक्रीतमधिकृत्य कृतमाख्यानं यवक्रीतशब्देनोच्यते एवं प्रियंगुमधिकृत्य कृतमाख्यानमप्युपचारात्प्रियंगुशब्देनोच्यते।।वा
१२ सवदत्तिकइति।।वासवदत्तामधिकृत्य कृता आख्यायिका अधिकृत्य कृते ग्रंथ इत्यत्रार्थे वृद्धाच्छस्तस्य लुबाख्यायिकाभ्यो बहुलमिति लुप
तत्र तेनेनटकु एवं सुमनोत्तरिकइति।। ऐतिहासिकइति। इतिहासीदिति पठ्यते मङ्गितिहासः पृषोदरादित्वात् साधुः सर्वसादेरिति।।स
र्वादेःसादेर्द्विगोर्लुगनपत्य इत्ययमेव लुक्स्मारितः।सर्ववेदइति सर्ववेदानधीत इत्यणो लुक्।सवार्तिकइति।वार्तिकानधीत इति अने
कवचनेसहशब्दस्याव्ययीभावः अव्ययीभावे चाकाल इति सभावः ततो णो लुक्।अनुसूरिति।।अनुसूशब्द षकमुत्पादयति लक्षल
वे क्षणाशब्दो यैत्यर्थः।।आनुसुकइति।अनुसूमधीत इति टकू तस्येसुसुकात्ताकइति कादेशः केणइति ह्रस्वः।पदोत्तरपदादिति।।प
दशब्द उत्तरपदं यस्य स तथोक्तः पूर्वपदमधीते पूर्वपदिक उत्तरपदिकः।शतषष्टेरिति।।शतशब्दात् षष्टिशब्दाच्च परो यःपथिशब्दः
तदन्तात् षिकन्प्रत्ययो भवति षकारो ङीषर्थः।।अनुब्राह्मणादिनिः।ब्राह्मणसमद्शब्द इति।यथार्थे यदव्ययमिति सादृश्येऽव्ययीभावः।।
यउ चोदर्थ इति मत्वर्थ इति।।परिहरति तेनेत्तस्मादिति।।दूषयति चानभिधानादिति।।साध्यापरिहारमाह अरण्यानि वत्यर्थे लवचनमिति।क्वचित्तु
र्थर मवेइत्यादि नपठ्यते।। ।।[redacted] राम
[redacted]वसंतादिभ्यष्ठक्।। वसंतसहचरितं इति यत्तत्वसंतो वर्ण्यते येन ग्रंथ सवसंतस्तमाह चर्यात्र्द्व्यंसमते।। १२

७५४

स्य३

ते६

उक्कादिषे तिपठितस्मात्तेवावसंत्यादिषु ठ पातुनक्त तमित्येव। अथ पर्वेनु शब्दो त्रपृथक्तो ऽस उपचारेरणा पर्वरणा योक्रेयं येव नतेच पवृीराम धी
ते ऽत्रा पर्वरिणकः। दंदिनायनहा स्त्रिणाप नार्पर्वरिणके ति निपातनगन्नुक्तोहितइति दिलोपा भावः॥ चीकाल्लुक॥ ॥ योक्तम हयुरितइति। अ
र्थशो क्तवादर्थे नच त्रयपप्रयो वीपर्यायोगान्मुख्या र्थासं भवान्नैराणस्य यहणामित्यर्थः। अपर आह योक्तशब्द इहस्वे पतितेनतदधिका
र्विहितः स्त्रपयोगत्यज्यतइति। यदि वा योक्ते भवः योक इति सो ऽयंतद्धितनिर्देश ः। पाणिनीयमिति ननु पणिनस्यापत्यं पणिनस्या
पत्यं पाणिनः पाणिनस्यापत्यं पाणिनो युवा पाणिनिः तत्र तेन प्रोक्तमित्यर्थे विवक्षायां पाणिनिशब्दात् इञो लुकि कृते प्रत्ययलक्षणे
नेञश्चेत्यण् प्राप्नोति॥ नैष दोषः इञश्चेत्यत्र रावादिभ्यो गोत्र इत्यतो गोत्र इत्यनुवर्तते नेन विशेषयिष्यामः गोत्रे य इञ् विहितस्तदं
तादिति तत्र पारिभाषिकं च गोत्रं गृह्यते नेह यूनी ञो ऽनभिधानात् ततो वृद्धाच्छः। आपिशलिशब्दादि इञश्चेत्यण् उभयत्राप्येत तदपत्यप
स्य लुक्। न तत्र लुकि सत्यसति वा तदेव रूपमिति नास्ति विशेषः। तत्राह स्त्रियां च स्वरे च विशेष इति। असति हि लुकि स्त्रियां टिड्ढाणञि
त्यादिना ङीप् स्यात् अणा स्वरेणांतोदात्तत्वं च। लुकि तु सति दाक्षिवत् स्वरेणामध्योदात्तत्वं च। आपिशलेस्तु स्वरे नास्ति विशेषः यथा तत्तु
कि सत्यपि शिलेयत्वे ङीन्न भवति तथा अनुपसर्जनादित्यत्र प्रपञ्चपादे॥ ॥ स्त्राबकोपधात्॥ अष्टकं सूत्रमिति। अष्टाध्यायाः परिमा
णमस्य संख्यायाः संज्ञासंघसूत्राध्ययनेष्विति संख्यायाः अतिशदन्तायाः कन्। संख्याप्रकृते रिति वक्तव्यमिति॥ संख्याप्रकृ

पि२

